## पञ्चमः पाठः

# विद्या-महिमा

विद्या ददाति विनयं, विनयाद् याति पात्रताम्।
पात्रत्वाद् धनमाप्नोति, धनाद् धर्मः ततः सुखम्।।१।।

विदेशेषु धनं विद्या, व्यसनेषु धनं मतिः।
परलोके धनं धर्मः, शीलं सर्वत्र वै धनम्।।२।।

सुन्दरोऽपि सुशीलोऽपि कुलीनोऽपि महाधनः।
शोभते न विना विद्यां, विद्या सर्वस्य भूषणम्।।३।।

विद्या रूपं कुरूपाणाम्, निर्धनानां धनं तथा।
निर्बलानां बलं विद्या, साधनीया प्रयत्नतः।।४।।

विद्वत्वं च नृपत्वं च, नैव तुल्यं कदाचन।
स्वदेशे पूज्यते राजा, विद्वान् सर्वत्र पूज्यते।।५।।

अलसस्य कुतो विद्या, अविद्यस्य कुतो धनम्।
अधनस्य कुतो मित्रम्, अमित्रस्य कुतो सुखम्।।६।।

पुस्तकस्था तु या विद्या, परहस्तगतं धनम्।
कार्यकाले समुत्पन्ने न सा विद्या न तद् धनम्।।७।।

किं कुलेन विशालेन, विद्याहीनस्य देहिनः।
अकुलीनोऽपि विद्यावान्, देवैरपि स पूज्यते।।८।।

### शब्दार्थाः

देहिनः = शरीर में
ददाति = देती है
साधनीया = अर्जित करनी चाहिए
पात्रत्वात् = योग्यता से
कुरूपाणाम् = कुरूपों का
निर्बलानां = शक्तिहीनों का
कदाचन = कभी भी
विद्याहीनस्य = विद्या से रहित
या = जो
नैव = न हि
प्रयत्नतः = प्रयत्नपूर्वक
अविद्यस्य = विद्यारहित का

| | | | |
|---|---|---|---|
| महाधनः | = बहुत धनी | अमित्रस्य | = मित्र रहित का |
| अलसस्य | = आलसी का | व्यसनेषु | = विकारों में |
| कुतो | = कैसे | शीलं | = चरित्र |
| शोभते | = सुशोभित होता है। | पुस्तकस्था | = पुस्तक में लिखी हुई, |
| परहस्तगतं | = दूसरे के हाथ में गया हुआ, | | |
| अकुलीनोऽपि | = अच्छे कुल में जन्म न लेने पर भी | | |

## अभ्यासः

१. एकपदेन उत्तरं लिखत–

(क) विद्या किं ददाति?

(ख) कः सर्वत्र पूज्यते?

(ग) देवैः कः पूज्यते?

(घ) विदेशेषु विद्या किम् भवति?

२. योजयत–

| | (अ) | (ब) |
|---|---|---|
| (क) | विद्या ददाति विनयं | नैव तुल्यं कदाचन। |
| (ख) | अलसस्य कुतो विद्या | व्यसनेषु धनं मतिः। |
| (ग) | विद्वत्वं च नृपत्वं च | विनयाद् याति पात्रताम्। |
| (घ) | विदेशेषु धनं विद्या | विद्याहीनस्य देहिनः। |
| (ङ) | किं कुलेन विशालेन | अविद्यस्य कुतो धनम्। |

३. रिक्तस्थानानि पूरयत–

(क) पात्रत्वाद् ............... आप्नोति ............... धर्मः।

(ख) पुस्तकस्था तु या ...............।

(ग) स्वदेशे ............... पूज्यते। ............... सर्वत्र पूज्यते।

(घ) ............... सर्वस्य भूषणम्।

(ङ) ............... धनम्।

४. कोष्ठकात् चित्वा विलोमशब्दैः मेलयत–

| | (अ) | | (ब) |
|---|---|---|---|
| (क) | सुखम् | × | अकुलीनः |
| (ख) | विदेशेषु | × | शत्रुः |
| (ग) | इहलोके | × | निर्धनः |
| (घ) | महाधनः | × | दु:खम् |
| (ङ) | सुन्दरः | × | कुरूपः |
| (च) | निर्बलः | × | स्वदेशेषु |
| (छ) | विद्वान् | × | दु:शीलः |
| (ज) | मित्रम् | × | परलोके |
| (झ) | कुलीनः | × | सबलः |
| (ञ) | सुशीलः | × | मूर्खः |

५. उदाहरणानुगुणं अन्वयपूर्तिं कुरुत–

विद्या ददाति विनयं विनयाद् याति पात्रताम्।
पात्रत्वाद् धनमाप्नोति धनाद्धर्मः ततः सुखम्।

अन्वयः विद्या विनयं ददाति, विनयात् पात्रतां याति।
पात्रात्वाद् धनं आप्नोति, धनाद् धर्मः, ततः सुखम्॥

(क) कुरूपाणां ............... विद्या, निर्धनानां .................तथा।
निर्बलानां बलं ................, ...................... प्रयत्नतः।

(ख) विदेशेषु .................. धनं, व्यसनेषु मतिः ....................,
परलोके ..................धनं, .........................सर्वत्र वै धनम्।

६. 'विद्या' विषये संस्कृते पञ्च वाक्यानि लिखत।

योग्यताविस्तारः –

- पाठस्थश्लोकान् कण्ठस्थीकुरुत।
- 'विद्या' इति शब्दमधिकृत्य अन्यश्लोकानां सङ्ग्रहणं शिक्षकस्य साहाय्येन कुरुत।